Sastri III year (Sahityam) ① From Dr. E.P. Sreedevi

~~प्रथम~~ Fifth Paper. Sahitya Darpana.

2 Mark Questions.

1 कः रसतामेति? Ans – रत्यादिः स्थायी भावः।

2 सात्त्विकाः किं रूपाः? – अनुभावरूपाः।

3 रसाः प्रतीयन्त इति कीदृशो व्यवहारः? ओदनं पचतीति वद् व्यवहारः।

4 सत्त्वं नाम किम्? – रजस्तमोभ्यामस्पृष्टं मनः।

5 चमत्कारो नाम कः? चित्तविस्ताररूपः विस्मयापरपर्यायः

6 रसे सारः कः? चमत्कारः।

7 घटप्रदीपन्यायस्य कोऽर्थः? घटस्थमेव दीपं प्रज्वालिते दीपस्य घटस्य च युगपद् प्रकाशनं जायते।

8 स्वादनाख्यः व्यापारः केभ्यः विलक्षणः? कृतिज्ञप्तिभेदेभ्यः।

9 करुणादावपि रसे सुखं जायते इत्यत्र प्रमाणं किम्? सचेतसामनुभवः

10 व्यापारोऽस्ति विभावादेः। स व्यापारः कः? साधारणीकृतिः।

11 लोके कारणं काव्ये किं वर्तते – विभाव।

12 लोके कार्यं काव्ये किं वर्तते – अनुभाव।

13 लोके सहकारि काव्ये किं वर्तते – सहकारिकारणम्।

14 केन न्यायेन चर्व्यमाणः रसो भवति – प्रपानकरसन्यायेन

15 अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्। केन केन कारणेन?

Ans. परिमितत्वात् लौकिकत्वात् सान्तरायतया च

16 अनुकर्तृगतो रसो न। कुतः? नटः शिक्षाभ्यासादिना रामादेरूपतां दर्शयति, न रसमास्वादयति।

17 तस्मान्न कार्यः? कुतः? विभावादिसमूहालम्बनकः

18 नो नित्यः रसः। कुतः? पूर्वसंवेदनोज्झितत्वात्।

19 रसः न वर्तमानोऽपि। कुतः? कार्यज्ञापकविलक्षणभावात्।

20 साहित्यदर्पणस्य तृतीयपरिच्छेदस्य नाम किम्?

रसनिरूपणम्।

21 काव्यं कतिविधम्? - द्विधा मतम्।

ध्वनिकाव्यं गुणीभूतव्यङ्ग्यकाव्यम्।

21 ध्वनिकाव्यस्य लक्षणं किम्?

"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम्।"

22 ध्वनिकाव्यस्य द्वौ भेदौ कौ? - अविवक्षितवाच्यध्वनिः विवक्षितान्यपरवाच्यध्वनिः।

23 अविवक्षितवाच्यो किं मूलकः? लक्षणामूलकः।

24 अभिधामूलध्वनिः कः? विवक्षितान्यपरवाच्यध्वनिः।

25 अविवक्षितवाच्यध्वनेः भेदद्वयं किम्?

अर्थान्तरसङ्क्रमितवाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः।

26 विवक्षिताभिधेयोऽपि द्विविधः। कथम्?

असंलक्ष्यक्रमः, लक्ष्यक्रमश्च।

27 असंलक्ष्यक्रमः कीदृशो गण्यते? रसभावादि।

28 लक्ष्यक्रमध्वनिः किं सन्निभः? अनुस्वानसन्निभः।

Scanned with CamScanner

29 शब्दशक्त्युद्भवः कतिविधः? वस्त्वलङ्कारत्वेन द्विधा।

30 अर्थशक्त्युद्भवध्वनिः कतिविधः? द्वादशविधः।

31 "त्विषि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्या प्रतापं न विषेहिरे॥"
इत्यत्र पद्ये केन कोऽलङ्कारो व्यज्यते?
अत्र पद्ये स्वतःसम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते।

32 सज्जयति सुरभिमासो इत्यादौ कीदृशं वस्तु?
कविप्रौढोक्तिसिद्धं वस्तु।

33 शब्दार्थशक्त्युत्थः कतिविधः? एकविधः।

34 पदद्योत्येन सुकवेर्ध्वनिना भाति भारती इति कस्याभिप्रायेण? ध्वनिकृतो आनन्दवर्धनस्य।

35 गुणीभूतव्यङ्ग्यकाव्यं कतिविधम्? अष्टविधम्।

36 गुणीभूतव्यङ्ग्यलक्षणं किम्?
अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये।

37 अयं स रशनोत्कर्षी इत्यादौ किं कस्याङ्गम्?
शृङ्गारः करुणस्याङ्गम्।

38 मन्नाभि कौरवशतमित्यादि पद्यं कस्योदाहरणम्?
काक्वाक्षिप्तस्य

39 असुन्दरस्योदाहरणं किम्? वानीरकुञ्जोड्डीनेत्यादि।

40 साहित्यदर्पणस्य चतुर्थपरिच्छेदस्य नाम किम्?
ध्वनिगुणीभूतव्यङ्ग्यकाव्यनिरूपणम्।

Scanned with CamScanner

विभावानुभावादि ३।    (4)    E.P. Sreedevi. S III / V

रसलक्षणम्।

विभावना ... सचेतसाम् इति विभावनानां

रसलक्षणम्। विभावेन अनुभावेन तथा सञ्चारिणा च

व्यञ्जितः रत्यादिः स्थायीभावः रसतां प्राप्नोति लक्षण

विभावयन्तीति विभावाः भवन्ति। विभावयन्ति आस्वाद

योग्यतां नयन्तीत्यर्थः। अनुभावयन्तीति अनुभावाः।

अनुभावाः कार्यरूपाः। विभावानन्तरं तेषु ये कार्यरूपा

हसन-भ्रुकुटीवक्रीकरण, कटाक्ष-भुजाक्षेपप्रभृतयः

जायन्ते तेऽनुभावाः। व्यभिचारिभावाः तात्कालिकभावाः

उद्भूय ~~विङ्ग~~ झटिति विनश्यमाना भावाः - हर्षलज्जौ

त्सुक्यादयः भावाः। एभिः सर्वैः व्यज्यमानः रत्यादिः

स्थायिभावः ~~रस~~ एव रस इति रसलक्षणम्।

शृङ्गारादयो नव रसाः वर्तन्ते। तेषां सर्वेषां तत्र

विभावादयश्च क्रियन्ते। ते विभावाः प्रथमं द्विधा

भवन्ति। आलम्बनोद्दीपन भेदेन। तत्तदनुभावाः

तथा व्यभिचारिभावाश्च मिलित्वा रसप्रतीतिं

जनयन्ति। अतः रसः दध्यादिन्यायेन रूपान्तर

परिणतो भवति। दुग्धं दध्या किञ्चिन्मिश्रितं

चेत् किञ्चित्समयानन्तरं अम्लास्वादयुक्त दधित्वे

न परिणामितं जायते। एवं रत्यादिः (रत्यादयः) स्थायी

विभावानुभावव्यभिचारिभावैः युक्तः ~~सन्~~ (सन्) शृङ्गार

रसत्वेन परिणतो भूत्वा आस्वाद्यते। रत्यादिः

Scanned with CamScanner

Para.

रसाः प्रतीयन्ते इति कथनं ओदनं पचतीति कथनवत् भवति। वस्तुतः तण्डुलं पचति, ततः तत् ओदनत्वेन जायते। तथापि लौकिकव्यवहारे ओदनं पचतीति उच्यते। तद्वदेव रसाः प्रतीयन्ते इति व्यवहारः। पुनश्च अत्र रसलक्षणे रत्यादिपदोपादनेनैव स्थायीति अनुक्तेऽपि स्थायिग्रहणं जायते। ~~इति चेत्~~ तथापि रसलक्षणे रत्यादिः स्थायिभावः इति उक्तत्वात् स्थायीति व्यक्ततया उक्ता इति न वाच्यम्। तत्र लक्षणे अत्र स्थायिपदोपादानं रत्यादीनामपि रसान्तरेषु अस्थायित्वप्रतिपादनार्थमेव। हास्यक्रोधादयः शृङ्गारवीरादौ व्यभिचरन्तीति बोधयितुं तदुक्तिः।

---

2 अयं रसस्यालौकिकत्वं स्पष्टयत।

विभावेना.... इत्यादि रसलक्षणम्।

"सत्त्वोद्रेकादखण्ड..... ...मास्वाद्यते रसः" इति रसस्वरूपकथनं भवति। अयं रसः लोकोत्तरचमत्कारप्राणः भवति। लोकात् उत्तरः श्रेष्ठः लोकोत्तरः नाम अलौकिकः भवति। एवं अलौकिकचमत्कारयुक्तः सः रसः। चमत्कारो नाम विस्मयापरपर्यायः चित्तविस्ताररूपो भवति। तादृशचमत्कारः यस्य प्राणभूतो भवति तस्य रस इति नाम भवति। अयं कारकज्ञापकाभ्यां विलक्षणः

Scanned with CamScanner

स्वादनात्मकः कश्चित् व्यापारो भवति। पुनश्च रस इतराणि नामानि ज्ञातानि भवन्ति। रसनास्वादन-चमत्करणानि भवन्ति। चर्वण-गमन-प्रत्यायन-व्यञ्जनादिव्यापारजन्यम् भवति अयं रसः।

~~अयं रसः~~ सर्वेऽपि रसाः आनन्दमयाः भवन्ति। करुणबीभत्सरौद्रभयानका अपि रसाः आस्वाद्यमाना भवन्ति। अत उच्यते - "करुणादावपि रसे जायते यत् परं सुखम्" इति। अत्रानुभवप्रमाणकः सहृदयः भवति। यदि करुणादौ रसे दुःखित्वं एव भवेदित्यनुच्यते चेत् तत्र रसे न कोऽपि उन्मुखो भवेत्। किन्तु दशरथादि स्वर्गप्रापण वर्णने सर्वेऽपि सहृदयाः पुनः पुनरास्वादमनु भवन्तीति तत्त्वं वर्तते। अतः लोके मरणं दुःखकारि चेत् काव्ये तदानन्दकारि। नाम रसस्यालौकिकत्वम्। अलौकिको वर्तते। एवं च लोकेषु शोकहर्षादयः लौकिका एव जायन्ते। काव्येऽपि शोकहर्षादयः अलौकिकाः जायन्ते। लोके करुणे दुःखित्वमनुभूयते। काव्ये करुणे आस्वादत्वमनुभूयते इति अलौकिको भवति रसास्वादः। लोके शोकहर्षादयः कारणानि जायन्ते। काव्ये शोकहर्षादयः अलौकिकत्वं प्राप्य विभावादयो जायन्ते। तेभ्यः सुखमेव जायते।

तत्सुखं सुरते दन्तपातादिरिव वर्तते । एवं रसो ~~~~
अलौकिको भवति ।

3 पुनः उक्तं हरिश्चन्द्रादीनां कथाश्रवणे-
नायाभवाः नाट्यकृत्अभिनेतृणां सहृदयानां अश्रु-
पातादयो जायन्ते इति । ततोऽनन्तरं विश्वनाथः वदति ।
तेऽश्रुपातादयः न दुःखानुभवात् किन्तु चेतसः
द्रुतत्वात् जायन्ते इति । तदुक्तं तेन साहित्यदर्पणे
यथा - "अश्रुपातादयस्तद्वत् द्रुतत्वाच्चेतसो मताः ॥"
इति ।

4 "न जायते रसास्वादो विना रत्यादिवासनाम्" ॥
विशदयत ।

वासनात रसास्वादहेतुः भवति । सहृदयानां
रसास्वादः रत्यादिवासनां विना न जायते । सा
वासना द्विधा - इदानीन्तनी प्राक्तनी चेति । यथा
येषाम् इदानीन्तनी वासना न भवति तर्हि श्रोत्रियाणां
जरन्मीमांसकानामपि रसास्वादो जायेत । किन्तु तन्न
दृश्यते । प्राक्तनी वासना येषां नास्ति तर्हि तेषां
रागिणामपि रसोद्बोधो न जायते । अतः सहृदयस्य
इदानीन्तनी वासना प्राक्तनी वासना च भवेत् ।
अतः उक्तं - "सवासनानां सभ्यानां रसस्यास्वादनं
भवेत् । निर्वासनास्तु रङ्गान्तः काष्ठकुड्या-
श्मसन्निभाः ॥" इति । सहृदयानां वासनाद्वयस्य
सत्त्वे आस्वादो जायते । तद्रहितानां काष्ठ-कुड्य-
उपलादि सदृशत्वेन आस्वादलवोऽपि न
जायते इत्यर्थः ।

Scanned with CamScanner

5.– विभावादीनां रसोद्बोधे कारणत्वादित्वप्रतिपादनम्

लोके कारणकार्य - सहकारिरूपाः कारकाऽलौकिक एवं प्राप्त विभावानुभावव्यभिचारिनामभिः व्यपदिश्यन्ते । तदुच्यते -

कारणकार्य-सञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्या कारणान्येव ते मताः ॥ इति ।

तेषां विभावादीनां त्रयाणां आस्वादे एकप्रतिभास मानत्वं कथमित्युच्यते - "प्रतीयमानः प्रथमं .... रसो भवेत् । (का॰ 15 & 16 पूर्वा) एवं च गुड, उपूषण मधु मेलनेन यथा पानकरसास्वादः न पृथकतया प्रतीयन्ते तद्वत् विभावानुभाव व्यभिचारिमेलनेन रसास्वादः प्रतीयते न तु एतेषु त्रिषु स्थितेषु व्यस्ततया । तदा प्रश्नः जायते त्रिषु (विभावादिषु) एकस्य द्वयोर्वा सत्त्वे रसास्वादस्य पूर्तिः जायते वा इति । तत्रोत्तरं तु "सद्भावश्चेद्विभावादेः .... दोषो न विद्यते ॥ (16 & 17 पूर्वा) अर्थात् एकस्य सत्त्वेऽन्ययोः द्वयोः आक्षेप, द्वयस्य सत्त्वेऽन्यस्य आक्षेप रसास्वादस्य न कोऽपि विघ्न इति । उदा॰ "दीर्घाक्षं शरदिन्दु इत्यादि कालिदासीयं पद्यम् । अत्र विभावत्वेन मालविका (मालविकाग्निमित्रनाटकं) ग्रहणं स्पष्टम् । किन्तु तस्याः अनुभावत्वेन नयनविस्तारित्वं व्यभिचारिभावत्वेन औत्सुक्यप्रकाशनं च ~~अत्र~~ आक्षिप्य स्वीक्रियते । एवं च रसास्वादे त्रयाणां समुद्भवो वर्तते ।

Scanned with CamScanner

6 रसः न ज्ञाप्यः, ~~न कार्यः~~ ~~इत्यादि~~ स्पष्टयत।

Ans. रसः न ज्ञाप्यो भवति। रसस्य घटप्रदीप-न्यायेन ज्ञाप्यज्ञापकभावो नास्ति। ज्ञाप्यज्ञात सिद्धं वस्त्वेव ज्ञापयति। यथा दीपेन घटः। घटः पूर्वं सिद्धं वस्तु भवति - भूतले घटोऽस्तीति अन्धकारेऽपि घटस्य सत्वात्। पुनः ~~तस्मात्~~ दीपः तं घटं ज्ञापयति। एवं सिद्धस्य वस्तुनः कदाचित् (अन्धकारे) अज्ञा-तत्वं दीपे सति ज्ञातत्वं च भवति। रसः तादृशो न। अर्थात् पूर्वं सिद्धवस्तुरूपेणाभावात्। ~~अर्थात्~~ प्रतीतिः अव्यभिचारिणी भवति। कदाचित् अज्ञातत्वं कदाचित् ज्ञातत्वम् इति चेत् प्रतीतिः व्यभिचारिणी भवति। रसः तथा न प्रतीयते। रसस्य अव्यभिचारिणी प्रतीतिः भवतीति रसः न ज्ञाप्यः। अर्थात् रसः यदा प्रभृति प्रतीयते तदा प्रभृति निरन्तर प्रती-यते इति नायं ज्ञाप्यः।

7 रसो न कार्यः स्पष्टयत।

रसः कार्यो न इत्युच्यते सा दर्पणे

"यस्मादेष विभावादि समूहालम्बनात्मकः तस्मान्न कार्यः" इति। यदि रसः कार्यः स्यात् तदा विभावादिकारणक एव स्यात्। तथा चेत् रसप्रतीति-

वेलायां विभावादयः न प्रतीयेरन् । यतः कारण
ज्ञानं कार्यज्ञानं च न युगपत् जायेत । ~~कार्येषु~~
कार्यस्य नियतपूर्ववर्ति कारणं भवति । कारणाच्च
नियतपश्चात्वर्ति कार्यं च भवति । द्वयोरपि
समकालमेव वर्तनं न जायते । एवं चेत् कार्य
रूप रसप्रतीतिवेलायां कारणरूपविभावादयः न
प्रतीयेरन् । किन्तु रसास्वादे रसप्रतीतिवेलाया-
मेव विभावादिप्रतीतिरपि संभवति । अर्थात्
रसविभावादयोः युगपत् प्रतीतिः जायते । एवं च
विभावप्रतीति नियत पश्चात् रस प्रतीति रिति अनुभवाऽ-
भावात् रसः न कार्यः । एवं रसः न कार्यः ।

8 रसो न नित्यः । विशदयत ।

Ans — रसः न नित्यो भवति यतः पूर्वसंवेदनोज्झितः ।
यदि रसः नित्यः तर्हि सः विभावादिज्ञानात् पूर्वमपि
जायेत । रसस्य असंवेदनकाले भावो न विद्यते ।
रसः संवेदनशरीरः । अर्थात् लवणं जले लीयते । तद्वत्
रसः अन्यस्मिन् लीनो जायते । किन्तु असंवेदनकाले च
रसः न जायते । अतः रसो न नित्यः । नित्यं वस्तु असं-
वेदनकालेऽप्यसम्भवो नास्ति, सम्भवत्येव । अतः रसः
असंवेदनकालेऽसत्त्वम्भवात् न नित्यः । तदुक्तं सा. दर्पणे
"असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥ का. २१ इति ।

9. रसः न अविज्ञेयः । स्पष्टयत ।

रसः नापि अविज्ञेयस्तत साक्षादानन्दमयस्वप्रकाशस्वरूपत्वात । रसः आनन्दमयः स्वप्रकाशश्च भवति । अतः रसस्वरूपकथने उक्तं स्वप्रकाशानन्दचिन्मयः इति । यदि रसः अविज्ञेयः तर्हि तद्वर्तमानवेलायामेव भवनं भवेत । तथा न भवति । ~~कि ज्ञाव्य रसः~~ ।

10 रसः न वर्तमानोऽपि । वदत ।

Ans – कार्यज्ञापकविलक्षणभावात न वर्तमानोऽपि । यदि वर्तमानः तर्हि कार्यो वा ज्ञाप्यो वावश्यं भवितव्यः । किन्तु अयं रसः न ज्ञाप्यस्तथा न कार्यश्चेति उक्तत्वात ताभ्यां विलक्षणः कश्चित रसः न वर्तमानोऽपि भवति ।

11 रसः निर्विकल्पकं ज्ञानम् । समर्थयत ।

Ans – विभावादिपरामर्शविषयत्वात स्फुटतया परमानन्दमयत्वेन संवेद्यत्वात अयं रसः न निर्विकल्पकं ज्ञानं भवति । निर्विकल्पकज्ञाने ~~प~~ परमानन्दमयत्वेऽपि विषयप्रकारसंवेद्यत्वं न भवति । अतः रसे विभावादिविषयज्ञानं स्फुटं जायते इति कृत्वाऽयं न निर्विकल्पकम् ।

12 रसः न सविकल्पकसंवेद्यः – वदत ।

रसोऽभिलापसंसर्गयोग्यत्वविरहात न सविकल्पकसंवेद्यः । अभिलापः वचनप्रयोगयोग्यता भवति । रसः वाङ्मयतीतः तथा ~~शब्द~~ अभिलापः कर्तुं न शक्यते इति ~~स~~ न सविकल्पकसंवेद्यः ।

Scanned with CamScanner

13 रसः न परोक्षः । कथयत ।

रसः साक्षादनुभवस्वरूप इति न परोक्षः ।
स्वादनव्यापारस्य मनः संयोगेन जायमानोऽयम् इति
न परोक्ष इत्यर्थः ।

14 रसः नापरोक्षः (प्रत्यक्षः) । कथयत ।

रसः प्रत्यक्षान्तरविलक्षणो भवति ।
साक्षात् प्रत्यक्षाभिन्न इत्यर्थो नास्ति । प्रत्यक्षस्य
साक्षादिन्द्रियगोचरत्वमर्थः । काव्ये तु शब्दजन्य
विभावादिज्ञानजन्यत्वं रसस्य वर्तते । काव्यज्ञानं
तत्पठनश्रवणजन्यं भवति इति शब्दसम्भवत्वम् ।
न तु रामायणादिनामग्रहणमात्रेण अर्थात् प्रत्यक्षेण
जायमानम् । भावं च रसः न प्रत्यक्षः शब्दजं
भवात् ।

15. रसतत्त्वं किम्? ~~तस्मात्~~ तदुच्यते -
"तस्मादलौकिकः सत्यं वेद्यः सहृदयैः रसम्" 26 पूर्वा
इति । प्रमाणमत चर्वणीयात् । चर्वणा तु -
स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः इत्याकारकः
सः च प्रतिव्यक्ति भेदानुभवयुक्तमिति स्वाभिन्नो
भवति च ।

Scanned with CamScanner

Question. No.

16. काक्वाक्षिप्तं गुणीभूतव्यङ्ग्यं विशदयत।

साहित्यदर्पणकारः चतुर्थपरिच्छेदे गुणीभूतव्यङ्ग्यकाव्यानि विशदयति "तत्र इतराङ्गं, काक्वाक्षिप्तं वाच्यसिद्ध्यङ्गं सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् व्यङ्ग्यमसुन्दरमेवं..." इति अष्टौ भेदाः। तत्र काक्वाक्षिप्तं द्वितीयं भवति। काकुशब्दः 'कक लौल्ये' इति धातोः निष्पन्नः। भावं च वाच्यात् भिन्नमपि अर्थान्तरं स्वरवैलक्षण्यात् यत्र प्रतीयते तत्र काकुरस्ति। तदुक्तं "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" इति। यथा मथ्नामि कौरवशतमित्यादि। अत्र उग्रः भीमः (वेणीसंहारनाटके) वक्तीति वाच्यस्य कथितत्वं वर्तते। अत्र नास्ति काकुः वर्तते। न मथ्नामीत्यस्य मथ्नाम्येव इत्यर्थो लभ्यते। तत्र व्यङ्ग्यार्थः वाच्यस्य निषेधस्य सहभावेन स्थितत्वात् गुणीभूतव्यङ्ग्यत्वम्। भावं काक्वाक्षिप्तं गुणीभूतव्यङ्ग्यम्।

17. सन्दिग्धप्राधान्यं ~~म~~ विशदयत।

यत्र व्यङ्ग्यं प्रधानं उत वाच्यम् ~~व~~ इति वाच्यव्यङ्ग्ययोः प्राधान्ये सन्देहः। तत्र व्यङ्ग्यमपि सन्दिग्धप्राधान्यमस्ति। अर्थात् व्यङ्ग्यस्य प्राधान्यं सन्दिग्धं भवति। उदाहरणं "हरस्तु किञ्चित् परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः। उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि"॥ इति कुमारसम्भवगतं पद्यम्। अत्र विलोचनानि व्यापारयामास इत्यनेन प्रतीतं विलोचनव्यापारणं वाच्यम्। किन्तु परिलुप्तधैर्य उमामुखे बिम्बफलाधरोष्ठे इत्यादिपदानां सहायेन चुम्बनेच्छा व्यङ्ग्यम्। अनयोः कस्य प्राधान्यमिति सन्देहः।

Scanned with CamScanner

18 तुल्यप्राधान्यं गुणीभूतव्यङ्ग्यं स्पष्टयत ।

Ans- सन्दिग्धप्राधान्यमिव तुल्यप्राधान्यमपि व्यङ्ग्यं गुणीभूतमेव । अर्थात् यत्र काव्ये वाच्यव्यङ्ग्ये समप्रधाने तत्र गुणीभूतव्यङ्ग्यमेव । उदाहरणं यथा - ब्राह्मणातिक्रमत्यागो भवतामेव भूतये । जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ॥ इति

अस्मिन् वाक्ये जामदग्न्यः दुर्मनायते इति शब्दात् जामदग्न्यः दुष्टो भवेत् इत्यर्थः वाच्यः । तथा जामदग्न्यः क्षत्रियाणामिव रक्षसामपि क्षयं करिष्यतीति व्यङ्ग्यं च । अनयोः प्राधान्यं सममेव ।

19 असुन्दरं गुणीभूतव्यङ्ग्यं विशदयत ।

यत्र व्यङ्ग्यापेक्षया सुन्दरं भवति वाच्यं तत्र व्यङ्ग्यम् असुन्दरम् । यथा -

"वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥" इति ।

अत्र वेतसनिकुञ्जे दत्तसङ्केतः कश्चित् लतागृहं प्रविष्ट इति व्यङ्ग्यं भवति । किन्तु तस्मात् व्यङ्ग्यादपि वध्वाः अङ्गानि सीदन्तीति वाच्यस्यैव चमत्काराधिक्यं भवति । अतः व्यङ्ग्यमसुन्दरत्वात् असुन्दरं नाम गुणीभूतव्यङ्ग्यम् ।

Scanned with CamScanner